# संस्कृतवार्ताः

27.03.2024

सायम् - 06:20

## मुख्यवार्ता:

· लोकसभानिर्वाचनस्य प्रथमचरणाय नामाङ्कनस्य अद्य अन्तिमतिथिः वर्तते, द्वितीयचरणस्य निर्वाचनाय अधिसूचना श्वः निर्गता भविष्यति ।

· भारतेन दिल्ल्याः मुख्यमंत्रिणः अरविन्द-केजरीवालस्य निगडनम् अधिकृत्य अमेरिकायाः विदेश-मंत्रालयस्य प्रवक्त्रा प्रदत्तं वक्तव्यं विरुध्य स्वकीयः विरोधः प्रकटितः।

· केन्द्रीयमन्त्री भारतीय-जनतापार्टितिदलस्य नेता अनुरागिंसंह ठाकुर: प्रोदीरितवान् यत् नरेन्द्रमोदि-प्रशासनेन अनुच्छेदौ सप्तत्यधिक-त्रिशतं पञ्चत्रिंशत् अ इत्येतौ दूरीकृत्वा जम्मूकश्मीरे विकासमार्ग: प्रशस्तं कृतम्।

· मार्च-मासे सर्वतः अधिकं वैदेशिक-निवेश-प्रवाहम् आकर्षितं कृत्वा भारतेन अन्यानि एशियापण-संस्थानानि सुदूरं परित्यक्तानि ।

· आई.पी.एल् इति क्रिकेट्-क्रीडायाम् अद्य सनराईजर्स-हैदराबाद-दलं मुम्बई-ईण्डियन्स्-दलं सम्मुखीकरिष्यति।

## लोकसभानिर्वाचन-नामाङ्कनम्

लोकसभानिर्वाचनस्य प्रथमचरणाय नामाङ्कनस्य अद्य अन्तिमतिथिः वर्तते यद्यपि बिहारे नामाङ्कनपत्राणि श्वः यावत् प्रस्तौतुं शक्ष्यन्ते ।अस्माकं सम्वाददाता प्रोक्तवान् यत् प्रथमे चरणे सप्तदश-राज्याणां चतुर्णां केन्द्रशासितप्रदेशानां च द्वयुत्तरैकशतं लोकसभा-निर्वाचनासनेषु निर्वाचनं भविष्यति । अस्मिन् चरणे तमिलनाडु-राज्यस्य नवत्रिंशत् , राजस्थानस्य द्वादश , उत्तरप्रदेशस्य अष्ट , मध्यप्रदेशस्य षट् , उत्तराखण्ड-असम-महाराष्ट्राणां पञ्च , बिहारस्य चत्वारि, पश्चिमबङ्गालस्य त्रीणि , मणिपुर-अरुणाचलप्रदेश-मेघालयानां द्वे , छत्तीसगढ-मिजोरम-नागालैण्ड-सिक्किम-त्रिपुरा-अण्डमान-लक्षद्वीप-पुड्डुचेरी-जम्मूकश्मीराणां एकैकं च निर्वाचनासनानि निर्वाचनाय विचितानि सन्ति । नामाङ्कनपत्राणां समीक्षा मार्चमासस्य अष्टाविंशति दिनाङ्के भविष्यति सहैव त्रिंशद्दिनाङ्कात् पूर्वं नामाङ्कन-प्रतिग्रहणं कर्तुं शक्यते ।

बिहारे नामाङ्कनपत्राणां समीक्षा मार्चमासस्य त्रिंशद्दिनाङ्के भविष्यति अपि च अप्रैलमासस्य द्वि-दिनाङ्कं यावत् नामाङ्कनस्य प्रतिग्रहणम् अनुमतम् अस्ति । प्रथमचरणाय मतदानं अप्रैल-मासस्य नवदश-दिनाङ्के भविष्यति । द्वितीयचरणस्य निर्वाचनाय अधिसूचना श्वः निर्गता भविष्यति । अस्मिन् चरणे द्वादश-राज्याणां, केन्द्रशासितप्रदेशानां च एकोन-नवति-लोकसभा-निर्वाचनासनेषु निर्वाचनद्वन्द्वं भविष्यति । द्वितीये चरणे केरलस्य विंशतिः , कर्णाटकस्य चतुर्दश, उत्तरप्रदेश-महाराष्ट्रयोः क्रमशः अष्टाष्ट ,मध्यप्रदेशस्य सप्त , असम-बिहारयोः क्रमशः पञ्च-पञ्च , पश्चिमबङ्गाल-छत्तीसगढयोः त्रीणि, मणिपुर- त्रिपुरा-जम्मूकश्मीराणां क्रमशः एकैकं चेत्यादिषु निर्वाचनासनेषु निर्वाचनं भविष्यति । प्रत्याशिः अप्रैलमासस्य चत्वारि दिनाङ्कं यावत् नामाङ्कनं विधातुं शक्नुवन्ति मतदानं च षड्विंशति दिनाङ्के भविष्यति ।जम्मूकश्मीरं विहाय अन्येषु राज्येषु नामाङ्कनपत्राणां समीक्षा अप्रैलमासस्य पञ्चदिनाङ्कं यावत् करिष्यते । जम्मूकश्मीरे नामाङ्कनपत्राणां समीक्षा अप्रैलस्य षट्-दिनाङ्के भविष्यति ।

केजरीवाल:

भारतेन दिल्ल्याः मुख्यमंत्रिणः अरविन्द-केजरीवालस्य निगडनम् अधिकृत्य अमेरिकायाः विदेश-मंत्रालयस्य प्रवक्तृणा प्रदत्तं वक्तव्यं विरुध्य स्वकीयः विरोधः प्रकटितः । भारतीय-विदेश-मंत्रालयेन प्रोक्तं यत् प्रत्येकं देशस्य स्वकीया न्यायिकप्रक्रिया भवति । मंत्रालयः प्रोक्तवान् यत् एकः देशः अपेक्ष्यते यत् तेन अपरदेशानां संप्रभुता आन्तरिक-विषयाः च सम्माननीयाः । विशिष्टरूपेण सादृश्य-लोकतांत्रिक-व्यवस्थाभूतानां देशानाम् इदं कर्तव्यम् इतोऽपि अधिकम् आवश्यकं भवति , एतदतिरिच्य विरुद्धाचरणं विधाय विसङ्गतोदाहरणानि प्रस्तौष्यन्ते । विदेश-मंत्रालयः प्रोक्तवान् यच् देशस्य न्यायिक-प्रक्रिया स्वतंत्र-न्यायपालिकायाम् आधारिता भवति या निष्पक्ष-समयबद्ध-परिणामान् प्रति वचनबद्धा भवति । मंत्रालयः प्रोक्तवान् य़त् एतादृशेषु विषयेषु प्रासंगिकरहित-वक्तव्यानि अनुचितानि सन्ति ।

ठाकुर :

केन्द्रीयमन्त्री भारतीय जनतापार्टितिदलस्य नेता अनुरागिंसंह ठाकुर: प्रोदीरितवान् यत् नरेन्द्रमोदि प्रशासनेन अनुच्छेदौ सप्तत्यधिक-त्रिशतं पञ्चत्रिंशत् अ इत्येतौ दूरीकृत्वा जम्मूकश्मीरे विकासमार्ग: प्रशस्तं कृतम्। श्रीठाकुर: अद्य जम्मूनगरस्य झज्जर कोटली इत्यत्र वार्ताहरान् सम्बोधयन् आसीत्।

एफआईआई

मार्च-मासे सर्वतः अधिकं वैदेशिक-निवेश-प्रवाहम् आकर्षितं कृत्वा भारतेन अन्यानि एशियापण-संस्थानानि सुदूरं परित्यक्तानि। विदेशि-संस्थागत-निवेशकैः (एफआईआई) दिसंबरमासात् अन्तरं भारतीय-इक्विटी इत्यस्मिन् त्रिषष्टि-दशमलव-त्रि-बिलियन-डॉलर-मितस्य निवेशः कृतः अपरत्र गृह-संस्थानानि न्यूनातिन्यूनं सप्त-षष्ट्युत्तर-चतुश्शताधिक-द्विपंचाशत्-सहस्रकोटि-रुप्यकाणां निवेशं कृतवन्तः।

नितिनगडकरी-नामाङ्कनम्

महाराष्ट्रे भारतीय-जनता-पार्टीति दलस्य वरिष्ठ-नेता नितिनगडकरी अद्य जनपदकार्यालये नामाङ्कनं विहितवान् । सः नागपुर-लोकसभा-निर्वाचनासनात् निर्वाचनद्वन्द्वं विधास्यति ।अस्मिन्नवसरे मुख्यमन्त्री एकनाथशिन्दे , उपमुख्यमन्त्री देवेन्द्रफडनवीसः , महाराष्ट्रे भाजपाध्यक्षः चन्द्रशेखरबावनकुले च उपस्थिताः आसन् । अस्मिनेवावधौ शिवसेना-शिंदे-पक्षस्य नेता राजू-परवे अपि रामटेक-लोकसभा-निर्वाचनासनात् नामाङ्कनं विहितवान् । श्रीपरवे कांग्रेस्-दलस्य प्रत्याशिनं रश्मी-बरवे इत्येतां विरुध्य निर्वाचनद्वन्द्वं विधास्यति ।

छत्तीसगढ़-माओवादि:

छत्तीसगढराज्ये आदिवासि-बस्तर-सम्भागे अद्य सुरक्षाबलै: सह जाते संघर्षे विद्रोहि महिलाद्वयं समेत्य षड्-मओवादिन: मारिता:। अस्माकं वार्ताहर: प्रख्यापितवान् यत् घटनास्थलात् षड्माओवादिनां मृतशरीराणि वृहत्तमायां संख्यायां च शस्त्राणि विस्फोटकपदार्थानि च मिलितानि। अन्वेषणाभियानं सम्प्रति प्रचलत्येव।

वायुसेना प्रमुख:-संगोष्ठी

वायुसेना प्रमुखः मार्शल वी. आर. चौधरी इत्येष: उक्तवान् यत् बालाकोटसादृशेम, अभियानैन इदम् अभिज्ञायते यत् राजनीतिक-संकल्प-शक्तेः बले वान्तरिक्ष- शक्तिं शत्रूणां क्षेत्रे प्रभाविरीत्या प्रयोगं कर्तुं शक्यते। श्रीचौधरी अद्य नवदिल्ल्यां भावि-संघर्षेषु वान्तरिक्षशक्तौ एरोस्पेसपॉवर-इत्यस्मिन् पञ्चदशत मोयांजम्बो-मजूमदार-अन्तारास्ट्रिय-संगोष्ठ्यां स्वीयोद्बोधने वक्तव्यमिदं कथितवान्। वायुसेनाचमुखण कथितं यत् अन्तरिक्षस्य सैन्यकरणं शस्त्रिकरणं च एका अपरिहार्य-यथार्थ जात:।

निर्वाचनायोगः - विशिष्टं

निर्वाचनायोगः निवापनावधौ सप्तविंशति सूचना-प्रौद्योगिकीय-अनुप्रयोगानां प्रणालीनाञ्च प्रयोगं करोति । अस्माकं वार्ताहरः प्रख्यापितवान् यत् प्रौद्योगिकीनां अनुप्रयोग-अन्तर्जालपटनाञ्च माध्यमेन प्रयोग: प्रत्याशिनां कृते अपच अधिकारिणां कृते प्रक्रियां सरल ब्रिसते ।

पत्रसूचनाकार्यालय:-निर्वाचनम्

पत्र-सूचना-कार्यालय: लोकसभा-निर्वाचनस्य प्रसारकेभ्य: वार्ता-कर्मिभ्य: एकस्य विशिष्ट-अन्तर्जाल्यपटलस्य PIB.GOV.IN/ELEAT2024/INDEX.ASPX इत्येतस्य प्रारम्भं कृतवान्। एतस्मिन् पटले डिजिटल-फिल्प-बुक-सादृशा: विशिष्टता: विद्यन्ते, यस्मिन् अनेकेषां प्रकारकाणां विश्लेषणां दत्तांशानां च सम्बन्धिता: लेखा: समाविष्टा: सन्ति। वार्ता-प्रसारक-कर्मिण: निर्वाचन-सम्बद्ध- लेख-लेखनाय एतिस्मिन् पटले समुपलब्धनां सूचनानां प्रयोगं कर्तुं शक्यन्ते।

आई.पी.एल्

आई.पी.एल् इति क्रिकेट्-क्रीडायाम् अद्य हैदराबादस्य राजीव-गान्धी-इण्टरनेशनल-स्टेडियम् इति क्रीडाङ्गणे सनराईजर्स-हैदराबाद-दलं मुम्बई-ईण्डियन्स्-दलं सम्मुखीकरिष्यति । इयं स्पर्धा भारतीयसमयानुसारं सायं सार्ध-सप्तवादने क्रीडिष्यते ।

।। इति वार्ता: ।।